STOTRADHWANI

# २३. पादुका सहस्रम् - शेष पद्धतिः (१०)

सृष्टां भूमावनन्तेन नित्यं शेष समाधिना ।
अहं सम्भावयामि त्वा मात्मान मिव पादुके ॥ २३.१॥ ७५१॥

पद्माभोगात् पादुके रङ्गभर्तुः
पाद स्पर्शाद्भोग मन्यं प्रपित्सोः ।
शेषस्यैकां भूमिका मब्रवीत् त्वां
आचार्याणा मग्रणि र्यामुनेयः ॥ २३.२॥ ७५२॥

शेषत्व मम्ब यदि संश्रयति प्रकामं
त्वद्भूमिकां समधि गम्य भुजङ्ग राजः ।
त्वामेव भक्ति विनतै र्वहतां शिरोभिः
काष्ठां गतं तदिह केशव पादरक्षे ॥ २३.३॥ ७५३॥

मा भूदियं मयि निषण्ण पदस्य नित्यं
विश्वम्भरस्य वहनाद्व्यथितेति मत्वा ।
धत्से बलाभ्यधिकया मणिपादुके त्वं
शेषात्मना वसुमतीं निजयैव मूर्त्या ॥ २३.४॥ ७५४॥

तत्तादृशा निजबलेन निरूढ कीर्तिः
शेषस्तवैव परिणाम विशेष एषः ।

रामेण सत्य वचसा यदनन्य वाह्यां
वोढुं पुरा वसुमतीं भवती नियुक्ता ॥ २३.५॥ ७५५॥

शेषत्व सीमनियतां मणिपादरक्षे
त्वामागमाः कुलवधू मिव बालपुत्राः ।
त्वद्रूप शेष शयितस्य परस्य पुंसः
पादोपधान शयिता मुपधानयन्ति ॥ २३.६॥ ७५६॥

भरत शिरसि लग्नां पादुके दूरतस्त्वां
स्वतनु मपि ववन्दे लक्ष्मणः शेषभूतः ।
किमिद मिह विचित्रं नित्ययुक्तः सिषेवे
दशरथ तनयः सन् रङ्गनाथः स्वमेव ॥ २३.७॥ ७५७॥

भूयोभूयः स्तिमित चलिते यस्य सङ्कल्प सिन्धौ
ब्रह्मेशान प्रभृतय इमे बुद्बुदत्वं भजन्ति ।
तस्यानादे र्युग परिणतौ योग निद्रानुरूपं
क्रीडातल्पं किमपि तनुते पादुके भूमिकाऽन्या ॥ २३.८॥ ७५८॥

अहीनात्मा रङ्ग क्षिति रमण पादावनि सदा
सतामित्थं त्राणात्प्रथित निज सत्रत्व विभवा ।
अविद्या यामिन्याः स्पृशसि पुनरेकाह पदवीं
क्रतूना माराध्या क्रतुरपिच सर्वस्त्वमसि नः ॥ २३.९॥ ७५९॥

बहुमुख भोग समेतै र्निर्मुक्त तया विशुद्धि मापन्नैः ।
शेषात्मिका पदावनि निषेव्यसे शेष भूतैस्त्वम् ॥ २३.१०॥ ७६०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
शेष पद्धति स्त्रयोविंशी ॥